श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचिता

# ॥ श्रीलक्ष्मीनरसिंहपञ्चाशत् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनरसिंहपञ्चाशत् ॥

नृसिंहसूरिम् आचार्यं नृसिंहं परदैवतम्।
प्राप्यप्रापकभावेन प्रपद्ये परवानहम्॥

भक्तत्राणपरायणत्वम् अतुलं भक्तेषु सन्दर्शयन्
स्थूणाभेदनकर्मणापि घटयन् दिव्यां दयाम् अर्भके।
व्याप्तिञ्च स्वयमेव साधुनिवहे सर्वत्र सन्नादयन्
देवः श्रीनृहरिः मदीयहृदये जेजीयतां सन्ततम्॥ १ ॥

वेदानामपि गोचरो न भगवान् वेदैर्हि वेद्यो हरिः
भेदेनासुरवेश्मनि प्रमुदितः स्तंभस्य साक्षात् अभूत्।
दृष्ट्वा तृप्तिम् अवापुः अद्भुतवपुं कोपेन सौम्यं क्षणात्
प्राप्तुं तं प्रयतस्व मानस मम प्रीत्या समीच्या सदा॥ २ ॥

प्रह्लादः परभक्तियोगमहितः प्रह्लादयन् मानसं
सर्वेषूत्तमतामवाप्य नृहरिं साक्षाच्च कुर्वन् स्वयम्।
पूर्णस्सन् परमं प्रपद्य धरणावानन्दमत्युज्ज्वलं
त्वं चाश्वाश्रय तादृशं नरहरिं हे मानसाद्य स्थिरम्॥ ३ ॥

साधूनां परिरक्षणाय दुरितध्वंसाय सद्धर्मिणां
धर्मस्य स्थितये च जन्म लभते यद्यद्यदाऽपेक्षितम्।
सत्यं ज्ञानमनन्तमुज्ज्वलतरानन्दं सदा निर्मलं
तद् ब्रह्म स्वयम् उद्बभूव जगतां क्षेमाय सिंहाननम्॥ ४ ॥

भृत्यं रक्षितुम् उद्यतो बहुविधां रीतिं वरस्य स्मरन्
दिव्यं चापि सुदर्शनं पिहितवान् ब्रह्मोक्तिसंमाननः।
भक्तं भृत्यम् अनन्तशोभनगुणारामं किशोरं परं
गाढाश्लेषविधानसौभगमिदं सौदर्शनं ते वपुः ॥ ५ ॥

www.prapatti.com

प्रह्लादावनसंभृतेन वपुषा दिव्येन सेवां दिशन्
श्रीलक्ष्मीनरकेसरी वितनुतात् श्रेयांसि भूयांसि मे।
येन व्याप्तमिदं समस्तभुवनं यस्सन्निधत्ते सदा
तस्मादन्यमहो श्रयेय शरणं क्वा कथं वा मनः ॥ ६ ॥

वैकुण्ठे बहुशोभने मणिमयैस्तंभैस्सहस्रैर्युते
सत्त्वोन्मेषसमिद्ध्यमानसुभगे पर्यङ्कवर्ये सदा।
राजद्भास्करकोटितुल्यरुचिना सकाशमानः प्रभुः
दृष्टे तामसदानवस्य सदने जातो हि मां रक्षितुम्॥ ७ ॥

स्तंभः किन्नु चकार भव्यसुकृतं यः चेतनावाञ्चितः
तिष्ठन्नेव समस्तलोकशरणं योऽसूत सिंहाननम्।
नायं दारुमयो न चोपलमयः स्तंभो न वा मृन्मयः
नूनं श्रीनरसिंहजन्मनिलयो वैदूर्यवर्यात्मकः ॥ ८ ॥

जातः स्तंभवरं बभञ्ज नृहरिः चिच्छेद वक्षस्स्थलं
भक्तत्राणकृतक्षणस्य निखिलं क्रूरत्विदं चेष्टितम्।
उत्सङ्गे पितरं निधाय हृदयं निर्भिद्य पुत्रं परं
शान्तेन स्वयम् आलिलिङ्ग सुभगं वक्षः स्थलेनाद्भुतम्॥ ९ ॥

प्रह्लादे नरतां निरीक्ष्य नरतां तत्याज नैव स्वयं
तत्ताते मृगतामुदीक्ष्य मृगताम् अङ्गीचकारानने।
रूपव्याकरणं समस्तजगतां यत्कृत्यमाहुर्बुधाः
तद्रूपं न तृगस्य नैव मनुजस्येत्यद्भुतं दृश्यते॥ १० ॥

नास्तीत्याह पिता तदस्ति भुवने सर्वत्र पुत्रोऽवदत्
स्याच्चेत् दृष्टिपथं न याति भगवान् प्रपच्छ कस्मादिति।
एतावद्विरते हिरण्यकशिपौ नैव प्रभुस्संभवेत्
पुत्रं हन्तुम् अथोद्यतो दनुसुतः तस्माद्धि जज्ञे हरिः ॥ ११ ॥

सर्वव्याप्तिम् उशन्ति दैवतवरे नारायणे पण्डिताः
सर्वान्तर्यमनेन तादृशमिति प्राज्ञा हि निश्चिन्वते।



www.prapatti.com

स्थाणौ ज्ञानयुते तथैव हि जडे द्रव्ये च सत्तां हरेः
    व्यक्तिं दर्शयति स्म साधु तनवै तस्मै नमस्या इमाः ॥ १२ ॥

कोपः कञ्चन धिक्करोति करुणा चोरीकरोतीतरां
    नेत्रं तामसरक्तमांसलमतो दिव्यारविन्दोज्ज्वलम्।
हस्तौ पाटनसङ्गिनौ पटुतरावाश्लेषसुव्यापृतौ
    ताते तत्तनये विहारसरणिः दिव्या नृसिंहस्य नः ॥ १३ ॥

पुत्रं नाशयितुं यदा प्रववृत्ते सन्तं स्वकं दैत्यराट्
    धूर्तं तं निजघान दैवतवरः श्रीमान् नृसिंहो हरिः।
भेतव्यं न कदाऽपि साधुभिरिदं विश्वस्य तच्छासनं
    स्थातव्यं परभक्तियोगभरितैः क्षेमाय योगाय च॥ १४ ॥

दिव्य जन्म तथैव कर्म मनुजा जानीथ यूयं ममे-
    त्याह श्रीयदुपुङ्गवः करुणया तत्सत्यम् ईक्षामहे।
स्थूणातः कथम् उद्भवः दितिसुतध्वंसः कथं वा द्रुतं
    सौम्यक्रौर्यसमन्वयः कथमिवैकस्मिन् क्षणे जायताम्॥ १५ ॥

स्तंभं स्वेन विनिर्मितं मणिमयं निश्चित्य तेनोज्झितं
    गर्वात् यर्वंपितामहादिविनुतं गूढं न वेत्तुं क्षमः।
धिक्कुर्वन् तनयं च भीषणवचोगुंफैर्बलादर्दयन्
    दुर्दर्शं हि ददर्श दिव्यपुरुषं यादृच्छिकं दैवतम्॥ १६ ॥

किन्ते सद्म हरे ! हिरण्यकशिपोः स्तंभो न जानासि किं !
    भग्नः किं न पुनः सुराररिपि तत्याज स्वयं जीवितम्।
तस्मात् पुण्यतमे वसामि सदने तस्यैव किं नोचितं !
    प्रह्लादः परमाप्रियो हि वसति श्रेष्ठं ततः किं गृहम्॥ १७ ॥

विश्वं रक्षितुम् उद्यतेन विधिना दत्ते वरे दानवः
    विश्वं सत्त्वविवर्जितं विहितवान् धर्मं जघान स्वयम्।
धर्मो भागवतापराधनिचयो रूपं नृसिंहात्मना
    धृत्वा तं निजघान भूरियशसे धर्माय तस्मै नमः ॥ १८ ॥


www.prapatti.com

दूरीकर्तुमना हिरण्यकशिपुं दूरीचकार श्रियं
सा त्वज्ञातविनिग्रहा सकरुणा गुप्त्यै कदाचित् भवेत्।
तन्नाम्न्येव हिरण्यमस्त्यभिमतिस्तस्या अपि स्यादिति
नूनं योगनृसिंहरूपम् अभजत् वन्देऽद्भुतं दैवतम्॥ १९ ॥

वृत्तिं कल्पितवान् क्षणेन जगतां धर्मस्य चोन्मूलकं
हत्वा त्वं नृहरे नभश्चरगणान् भूयोऽपि सुस्थान् व्यधाः।
स्वं स्वं भागम् अवाप्य शोभनधियो भूयस्तरां खेचराः
निर्भीकास्सुखमाप्नुवन् मम विभो शान्तिं विधत्स्वादरात्॥ २० ॥

वेधा निर्वृतिमाप पाकदमनो भूतिं परां योगिनः
सिद्धिं सत्तपसां प्रसूतिम् अभजन् पुष्टिं तपस्याधनाः।
सर्वे किंपुरुषा महापुरुषतां विद्याश्च विद्याधराः
गन्धर्वाश्शुभगाननैपुणमहो किं किं न साध्यं हरे॥ २१ ॥

कोपश्शन्तिमयो रवः षुतिमयो देहोऽनुकंपामयः
वीक्षा धर्ममयी मनः प्रियमयं श्रोत्रे विवित्सामये।
श्वासास्तोषमयाः करौ सुममयौ जिह्वा सुधामय्यपि
ज्ञानानन्दमयं भजामि नृहरिं रक्षामयं दैवतम्॥ २२ ॥

येन त्वं सुरवैरिणं निहतवान् शिश्लेष येनार्भकं
येनैवाभयम् आश्रितेषु निदधे दध्रे च येनाचलः।
पद्मं येन धृतं धृता च हरिणी पद्मा सुभूत्यै सतां
सोऽयं रक्षणदीक्षितस्तव करो मां रक्षतादन्वहम्॥ २३ ॥

दुःखं दुर्धरम् अन्वभावि शिशुना भूयस्तरां दुर्वचं
तत्रोदासि कुतः त्वदीयनिधने किं नानुतापस्तव !।
स्वीयेनैव बलेन दानवसुतः संरक्षितश्चेत् वयं
कां शक्तिं परभक्तिरूपमहितां श्रद्धध्महे कथ्यताम्॥ २४ ॥

सिंहस्त्वं गिरिकन्दरेषु वसति संप्राप्य सम्मोदसे
स्तंभे तामससद्मनि स्थिरतरं स्थातुं कथं प्राभवः।


www.prapatti.com

स्तंभं तं तरसा प्रपीड्य दनुजप्राणांश्च कोलाहलात्
मोदं साधुजने तनोषि भगवन् संरक्ष माम् अर्भकम्॥ २५॥

सिंहास्सन्ति वने गिरौ च गहने तुङ्गे स्वतन्वा मृगाः
गुल्मे शैलपदे जनिस्तु विदिता तेषां निसर्गोचिता।
जातस्त्वं नरकेसरी मणिमयस्तंभात् गृहेऽरेः प्रभो
सर्वेष्वेव ततोऽचलेषु ददृशे नारायणः केसरी॥ २६॥

वैकुण्ठे प्रलये च नीरभरिते क्षीरोबुधौ वा सतां
स्वान्ते पर्वतमूर्धसु श्रुतिगिरां चूडापदे भूतले।
सन्ध्यायां शरणागतार्तिदलने प्रह्लादनामोद्धृतौ
भक्तानां परितो विभासि भगवन् श्रीमन् नृसिंह प्रभो॥ २७॥

एकं त्वं व्यहनो हिरण्यकशिपुं प्रह्लादहिंसोल्बणं
सङ्ख्यातुं च न पारयेर्मम कृते जानीहि न त्वं क्षमः।
तावन्तीह वसन्ति पुष्कलतया पापान्यसङ्ख्यानि मे
प्राज्ञानां परिभावकानि भवतो भीषाकराण्यप्यहो॥ २८॥

दृष्टं नैव च विश्रुतं भगवतस्ते रूपम् अत्यद्भुतं
जाया ते निजगाद नैव निकटे याति स्म या भीतितः।
तद् भव्यं वपुरातनोतु जगतां भद्राणि नित्यार्नि नो
ब्रह्मेशानमुखैर्यदेव बहुधा संसेवितं शाश्वतम्॥ २९॥

पश्येमाद्भुतरूपम् अञ्जलिभरा जीवेम भूयस्तरां
नन्दामाद्भुतचेष्टितेन नृहरेर्मोदाम दिव्यास्समाः।
दासास्तस्य भवाम साधु शृणवामानन्दवृत्तादिकं
प्रब्रूमश्शरदः शतं भगवतोऽजीता वयं स्याम च॥ ३०॥

दिव्यायाद्भुतकर्मणे दितिमुतध्वंसोद्यतायानिशं
भव्याय प्रियकारिणे भगवते शान्तोदितायात्मने।
वैकुण्ठाय नृसिंहरूपवहनायानन्दसन्दायिने
प्रह्लादप्रियसंभवाय महसे तुभ्यं नमस्या इमाः॥ ३१॥

स्तोत्रं तु किं यते मया चपलतः किं तेन दुष्टोऽस्म्यहं
तुष्टश्चेत कथमपि अनन्तविभवो धन्यो भवेयं ध्रुवम्।
ज्ञानं सङ्कुचित ममेति विदितं क्षोदक्षमं नेति चेत्
हन्ताहं परितोषमेमि भगवन् काचिन्न हानिर्मम॥ ३२॥

बाह्याडंबरलोकनेन बहवो भ्राम्यन्ति विज्ञानिनः
बाह्याडंबरमप्यनन्तमहिम ! त्वं स्वीकरोषि ध्रुवम्।
तेनैवासुरनायकोऽपि निधनं संप्रापितस्तत्क्षणात्
हित्वाऽऽडंबरजालमाशु नृहरे वात्सल्यतो रक्ष माम्॥ ३३॥

क्वाहं मन्दमतिः नृसिंहविभवः क्वेतीव चिन्ता न मे
भीत्या चैव लिखामि नैव परितो वाचा स्पृशामीश्वरम्।
धूर्तत्वं मम जागरूकमनिशं स्यान्मूर्खता बालता
रत्नेभयोऽपि यथाऽऽदरो भवति तत्पेट्यां तथा मत्स्तुतौ॥ ३४॥

अस्माकं तु सुदर्शनं दितिसुतस्यादर्शनं तत्त्वतः
प्रह्लादेन विशिष्टता नरहरेरेतद्धि संभिद्यते।
प्रायस्ते पुरतस्सुदर्शनमयं रूपं ततो दृश्यते
तावत्कं महदुल्बणं कथमिव प्राप्यं रथाङ्गेन ते॥ ३५॥

किं ब्रूयां तव वैभवं नरहरे ! कां वा सपर्यां हितां
कर्तुं संप्रति सर्वदेव सुभगां त्वत्तोषिणीं सन्मताम्।
सर्वत्र त्वमसीति रूपितमिदं तत्त्वं यदि स्वीकुरु
प्रायः प्रेष्ठतमं तथाऽन्यदपि वा प्रीत्या कृतार्थं कुरु॥ ३६॥

वेदात्मन् नृहरे विभासि कतमं रूपं प्रपद्य श्रुतौ
किं रूपं नमकस्य जातु चमकस्येत्येव सशीयते।
नेतिप्रत्ययवान् हिरण्यकशिपुः भावेतरं भावयन्
नास्तिप्रत्ययगोचरश्च चमकं त्वामाश्रये भूतये॥ ३७॥

स्तंभोऽभिद्यत दानवस्य हृदयं तीक्ष्णैर्नखैरञ्जसा
ब्रह्माद्वैतविदां विचारसरणिः तूर्णं तु चूर्णीकृता।

www.prapatti.com

ध्वस्ताहम्मतिराशु पामरजने नादेन निर्यापितो
    गर्वस्तेन विभेदयाद्य नृहरे मत्पापराशिं क्षणात्॥ ३८ ॥

माता त्वं नृहरिः नचैव विदितो भेदः पुमान् स्त्रीति वा
    वक्षोभेदनकर्मणा दृढतया जाने पुमांसं परम्।
साक्षीं ताकिङ्ककेसरी मम गुरुः त्वामाह सिंहीं परां
    न स्त्री नैव पुमानिति प्रथयितुं स्याच्चेष्टितं तेऽद्भुतम्॥ ३९ ॥

माता त्वं नहि मेयतामुपगतः स्मृत्या हि मेयं जगुः
    स्थूणा मानम् अभूत् मितो हि भवनस्तंभैकदेशे ध्रुवम्।
मातृत्वं व्यवृणोः निजार्भककृते वात्सल्यसन्धुक्षितः
    तत्तातस्य तु मापको भवसि चेत् क्लिष्टं समस्तं प्रभो॥ ४० ॥

प्राज्ञस्त्वां परिचिन्वते नरहरिं वैकुण्ठकण्ठीरवं
    मन्ये ते नरतां कदाचिदपि ते नेच्छन्त्यकस्मादपि।
वैकुण्ठो हरिरेव तस्य निलयो लोकोऽथ देशोऽपि वा
    वैकुण्ठीयहरिर्भवेदपि कथं ज्ञातुं प्रगल्भा वयम्॥ ४१ ॥

स्तंभात् उद्भव आशु नाशनमरेर्बालस्य संलालनं
    योगः पङ्कजया विशिष्टहसनं चकदिभिर्दर्शनम्।
सद्ध्वन्यध्वनि मानसे सुमनसां सद्वर्तनं सर्वदा
    स्मर्तॄणां परमाद्भुतं च निखिलं वृत्तं नृसिंहं प्रभो॥ ४२ ॥

सन्ध्यां त्वां परिचिन्वते सुकृतिनः सन्ध्योदितं दैवतं
    सन्धानं जगतां नृसिंहवपुषा सम्यक् त्वया सूचितम्।
सन्ध्या त्वं समभूर्हिरण्यकशिपोस्सायन्तनी तत्सुते
    प्राची मद्विषये विभासि भगवन् माध्यन्दिनीति ध्रुवम्॥ ४३ ॥

सिंहत्वं नरतोभयं त्वयि वयं प्रेक्षामहे भाग्यतः
    कान्तारे नरगन्धमात्ररहिते शैले गुहाभिर्युते।
स्वैरं सञ्चरणं तव प्रियतमं जानामि सिंहोचितं
    किं ते न स्वदते नरत्वसुभगं मच्चित्तसंशीलनम्॥ ४४ ॥

दोषाणां निलयो हिरण्यकशिपुर्दोषान् गुणानां निधौ
 दध्यौ स्वीयसुतेऽपि हन्त भवतीवात्यन्तहिंस्रोऽभवत्।
दोषं तं परिकल्प्य कारणतया जातः प्रदोषे स्वयं
 दुष्टं ध्वंसितवान् तयैव वृजिनध्वंसं विधत्स्वाद्य मे॥ ४५ ॥

रामे रञ्जितमानसे रतिकरे दिव्यात्मनामन्वह
 साक्षान्मन्मथमन्मथे रसमये कृष्णे च दृग्गोचरे।
रूपं ते परमं सटादिसहितं सैंहं सदा भीषकं
 कस्मात् वीक्षितुम् उत्सुकाः प्रतिदिनं जाने न ते वैभवम्॥ ४६ ॥

सिंहस्त्वं नहि सेव्यसे वनचरैस्सिंहैस्तथाऽन्यैर्मृगैः
 त्वाम् अत्यन्तविलक्षणं विसदृशं ज्ञात्वा द्रवन्त्येव ते।
सेवन्ते मुनयस्तथैव यतयो ज्ञात्वा परं पुरुषं
 तस्मादादरमातनोषि नृहरे सवविने सांप्रतम्॥ ४७ ॥

चिन्तातीतविभूतिकस्य भवतः तत्त्वं महान्तो जगुः
 चिन्त्य साधु विचित्ररूपगुणकर्मादैर्वरिष्ठैरपि।
निश्चिन्ता इह सञ्चरेम बहुधा संसेवमानाः प्रभो
 त्वाम् अत्यद्भुतमूर्तिभिर्नवनवाभिर्भ्राजमानं गिरौ॥ ४८ ॥

प्राह्लादी परमा नचास्ति भगवन् भक्तिस्त्वयि स्थेयसी
 प्राज्ञानाम् अनुवर्तनं च नहि मे संपद्यतां किं नु मे।
देवी सा करुणा न चास्ति यदि ते का वा गतिस्सम्भवेत्
 मामारादव मन्दमप्यतितरां श्रीमन्नृसिंहार्भकम्॥ ४९ ॥

स्तोतुं न प्रभवामि मन्दधीक्षणो जानामि चैतत् ध्रुवं
 नुन्नः सार्थकतां कडोमि वचसां द्वित्राक्षराम्रेडनात्।
वाचा त्वं पीरतुष्यसीति विदितं मज्जल्पनं स्वीकुरु
 श्रेयस्सन्ततिमादरेण पठताम् एतं स्तवं श्रीहरेः॥ ५० ॥

आत्रेयः कविवादिसिंहगुरुराट्सेवारतो भूतये
 भक्त्या श्रीनिधिराघवस्सुमनसां सेवात्मिकाम् आतनोत्।

मालोलो मधुसूदनो मधुमयी माता तया भार्गवी
मान्यो वेदशिरो गुरुश्च मुदिताः प्रीताभ वन्त्वन्वहम्॥ ५१ ॥

॥ इति श्रीलक्ष्मीनरसिंहपञ्चाशत् संपूर्णा ॥

www.prapatti.com